

फरवरी तः मार्च २०२२ पर्यन्तम्
पौष–कृष्ण–अमावस्याम् तः फाल्गुन–कृष्ण चतुर्दशी पर्यन्तम्
(वै–२०७८)

RNI
DELSAN/2013/50379
ISSN:2347-1565

# संस्कृत–चन्द्रिका

## मासिकी संस्कृत–बालपत्रिका

वर्षम्–९ संयुक्ताङ्कः–७–८

सम्पादकः
डॉ. अरुण कुमार झा
सचिवः

एक साहित्यिक त्रैमासिक पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ-साथ नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

# " संस्कृत मञ्जरी"

(आई.एस.एस.एन-2278-8360)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

**मूल्य:- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र**

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

# " संस्कृत मञ्जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**

**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**

**दूरभाष सं.- ०११-२३६३५५९२, २३६८१८३५**

ISSN-2347-1565

मूल्यम्- २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

फरवरी तः मार्च
२०२२ पर्यन्तम्

वर्षम्-९-संयुक्ताङ्कः-७-८

**(वै0—२०७८)**
**(पौष—कृष्ण—अमावस्याम् तः फाल्गुन—कृष्ण—चतुर्दशी पर्यन्तम्)**

सम्पादकः
डॉ. अरुणकुमार झा
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

पत्रिका-परामर्शकाः
डॉ. आशुतोषदयाल माथुरः
डॉ. पंकजा घई
डॉ. पूर्वा भारद्वाजः
डॉ. धनञ्जयमणित्रिपाठी


| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | संवत्सरः | श्री ऋषिराजः जानी | १ |
| ३. | मानवजन्मनस्सार्थकता | डॉ. केशवरामः शर्मा | ३ |
| ४. | कर्मयोगः | विद्वान्-गणेश ईश्वरः भट्टः | ५ |
| ५. | पर्यावरणम् | विद्यावाचस्पतिः-डॉ.सुन्दरनारायण झा | ११ |
| ६. | नन्दिनी | श्री महावीरप्रसादः शर्मा | १३ |
| ७. | कौटिल्यसम्मता गुप्तचरव्यवस्था | प्रो. मानसिंहः | १८ |
| ८. | जलियांवाला-बाग-हत्याकाण्डम् | श्री दिनेशचन्द्रः | १९ |
| ९. | धन्योऽयं भारतं देशः* | आचार्यः मनोजकुमारः डिमरी | २१ |
| १०. | व्यावहारिक-संस्कृत-शिक्षणम् | आचार्यः मनोजकुमारः डिमरी | २३ |


दिल्ली संस्कृत अकादमी
( राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः )
DELHI SANSKRIT ACADEMY
(Govt. of N.C.T. , Delhi)
ई-पत्रिका

## प्रकाशकः

सचिवः
दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005
दूरभाषः - 011-23635592, 23637798

## सदस्यताशुल्कम्

प्रति-अङ्कम् : 25 रूप्यकाणि
वार्षिकम् : 250 रूप्यकाणि

ISSN : 2347-1565
©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः
बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन (दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, Money order or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

**अयि सुरवाणीसमुपासकाः सहृदयाः!**

अपारोऽयं सुरभारती साहित्य सागरो यस्मिन् अस्माकं तपोधनैः विदितवेदितव्यैः ऋषिमुनिभिः अप्रतिम-प्रतिभाप्रभया दिव्यचक्षुषा महताश्रमेण च विषयाननुसन्धाय असंख्यग्रन्थरत्नानि विविधज्ञानविज्ञानकलादिपरिपूर्णानि विरचितानि सन्तीति विदितमेव सुधीवराणाम्।

लेखकानां पाठकानाञ्च बलेनैव पत्रिका सञ्चलति। अतः बालान्, छात्रान् लेखकाँश्च प्रेरयन्तु तथा च काव्य-प्रहेलिका-कथा-नाटकानादीनि च प्रेषयन्त्विति निवेदनम् अस्ति विद्वद्वरेभ्यः।

भावत्कः

**शकाब्दः १९४४** **डॉ. अरुणकुमार झा**

सचिवः

# संवत्सरः

-ऋषिराजः जानी

कार्तिकमासे तुलसीविवाहः
इक्षु-बदरमूलकनवस्वादः।

मार्गशीर्षगगनं ननु विमलम्
कृष्णं स्मर, कुरु गीतापठनम्।



पौषे कम्बलमानय शीघ्रम्
परिधापय माम् और्णं वस्त्रम्।

माघे पुण्यं तीर्थस्थानम्।
शिवरात्रौ 'शिव-शिव' इति गानम्।

फाल्गुने मलयानिलवाताः
आम्रतरौ कोकिलकुहूकाराः।

चैत्रे दिवसे पुष्पसुगन्धः
रात्रौ ज्योत्स्नाया आनन्दः।



वैशाखे तु प्रचण्डभानुः
समीरः स्पृशति न, स्पृशति कृशानुः।

स्वेदक्लिन्न-गात्राणि ज्येष्ठे
प्राणिनां प्राणा ननु कण्ठे।

आषाढे मेघा आयाताः
जनाः प्रसन्नाः, वृक्षाः स्नाताः।

श्रावणमासः शिवभक्तानाम्
पुण्यः समयः कथाव्रतानाम्।

भाद्रवदे तु पितृदेवताः
भवन्ति वरदा मुदा प्रीणिताः।

अश्विनमासे शरत्-चन्द्रिका
नवरात्रिषु भक्तिः सुखदा।

संवत्सरोऽपि यदा गच्छति
नववर्षं खलु पुनरायाति।



- ८ राजतिलक बंगलोज, आबादनगरम्,
बोपल, अहमदाबाद-५८

# मानवजन्मनस्सार्थकता

**–डॉ. केशवरामः शर्मा**

'लक्ष्मणपुर' राज्यस्याधिपते 'उदयसिंहस्य' राजसभायामेकदा एकः पण्डित आगच्छति। स नृपं प्रणम्य कथयति, यत्तस्यैकः प्रश्नोऽस्ति, यदि तत्रोपस्थितेभ्यः सर्वेभ्यः पण्डितेभ्यो मध्यात् कोऽपि तस्य प्रश्नस्य सम्यगुत्तरं दास्यति, तदा स तस्मै पुरस्काररूपेण शतरूप्यकाणि दास्यति। यद्यस्यां सभायां कोऽपि विद्वान् घटिकाद्वयपर्यन्तं प्रश्नस्योत्तरं न ददाति, तदाहं स्वयं तस्य प्रश्नस्योत्तरं दास्यामि। भूपतेश्च निवेदनमस्ति, यत् तदा स द्विशतरूप्यकाणि पुरस्काररूपेण मह्यं ददातु।

**उदयसिंहः–** भवतस्स्वागतमस्ति। अत्र ममैको निवेदनमस्ति। यदि कोऽपि मम सभासदः सम्यगुत्तरं ददाति, भवान् च तेन सन्तुष्टो भवति, तदाहं शतं रूप्यकाणि तस्मै, शतरूप्यकाणि च तुभ्यं दास्यामि।

यदि सर्वेऽपि निरुत्तरा भवन्ति, तदा भवान् तस्योत्तरं स्वयं दास्यति, यदि तेन सर्वेजनाः सन्तुष्टा भवन्ति, तदाहं तुभ्यं पञ्च शतानि रूप्यकाणि दास्यामि। इदानीं भवान् स्वप्रश्नं प्रच्छतु।

**पण्डितः** – अहमत्र षट् जनान् अन्वेष्टुमिच्छामि। तेषु द्वावद्यतनकालस्य, द्वौ भविष्यत्कालस्य, द्वौ चेदृशौ भवेतां यौ नाद्यतन कालस्य, न च भविष्यत्कालस्य भवतः।

प्रश्नं श्रुत्वा तस्यां सभायां सर्वे जनानां श्वासा अवरुद्धाः, कण्ठावरोधश्च प्रसृतः। नृप उदयसिंहोऽपि नैराश्येन खिन्न आसीत्।

सर्वेषामीदृशमकल्पितं भीषणं मौनं दृष्ट्वा नृपः कथयति–"यदि कोऽपि, किमपि तर्कसङ्गतमुत्तरं दातुमिच्छति, तर्हि स स्वबुद्धि कौशलं दर्शयतु। अत्र मानापमानस्य कोऽपि प्रश्नो नास्ति।"

तथैव मौनस्य भावं दृष्ट्वा नृपः कथयति–सर्वेभ्योऽल्पाहारस्य अत्रैव व्यवस्था भवेत्। तस्यानन्तरं भवन्तः स्वबुद्धिकौशलं दर्शयन्तु ।"

[सर्वे अल्पाहारं कुर्वन्ति। परस्पर वार्तालापमपि कुर्वन्ति। तदनन्तरं सर्वे शान्तभावेन तिष्ठन्ति।]

**उदयसिंहः–** यदि कोऽपि तस्य प्रश्नस्योत्तरं दातुमिच्छति, तस्य स्वागतमस्ति। [पूर्ववदेव मौनभावं दृष्ट्वा।



**उदयसिंह:–** हे विप्रवर! भवानेवास्या: प्रहेलिकाया: समाधानं कुरु।

**पण्डित:–** अद्यतनकालस्य स जनो भवति, येन पूर्वजन्मनि घोरतपस्यां कृत्वा आत्मनो जन्म: सफल: कृत आसीत्। तेषु एकोऽस्माकं सम्राड्रूपेण महाराज उदयसिंहोऽत्र शोभत एव, अपरं भवन्त: स्वयमेव चिन्तयन्तु।

अस्माकं शास्त्रेषु मानवजीवनस्य चतुर्षु आश्रमेषु संन्यासाश्रमस्य स्पष्टसङ्केतोऽस्ति, यत् वानप्रस्थाश्रमस्यान्ते मनुष्य: स्वगृहत्यागं कृत्वा, आत्मन: कल्याणाय संन्यासाश्रमे अवश्यमेव प्रविशतु।

'रामचरितमानसे' स्वयं भगवान् विष्णु: कथयन्ति, यत् 'महाराजकश्यपेन' तस्य पत्नी 'अदित्या' च तस्मिन् जन्मित भीषणं तपस्तप्मासीत्। तयोर्मया तदानीमेव इदं वरं दत्तमासीत् यत् तयोर्जन्मान्तरेऽहं तयोर्गृह पुत्ररूपेण जन्मग्रहणं करिष्यामि।

यदा तौ महाराज दशरथ तथा साम्राज्ञी कौशल्यारूपेण अयोध्यायाम् आस्ताम्, तदा प्रभु: तयोर्गृहे श्रीरामरूपेणोत्पन्नोऽभवत्। अनेदोदाहरणेन स्पष्टमस्ति, यत्पूर्वजन्मन: तप: प्रभावेणैव नरो जन्मान्तरे नृपस्य पदं लभते।

इदानीं भविष्यत्कालस्य जनस्थ चिन्तनमस्ति। अस्यां श्रेण्यां ते जना आयान्ति, येऽस्मिन् जन्मनि भगवतश्चिन्तने रता घोरतपस्यां कृत्वा, स्वकीयं जीवनं सफलं कुर्वन्ति। तेषामन्वेषणाय भवद्भिर्निर्जनवने गन्तव्यम्। नगरेऽपि महाराज जनकस्येव कोऽपि जनो लभ्यो भवति एव। यतो हि दिवाकाले महाराज जनको राज्यकार्यमकरोत्। निशायाञ्च स स्व प्रासादे एव निर्मिते कुटीरे तपस्विवत् कालं नयति स्म।

तृतीयकोट्यां प्राय: वयं सर्वे उदरम्भरिजना आयान्ति। ये स्वार्थलिप्ता, आत्मनो भौतिकसुखानि एव इच्छन्ति। तेषामिदं जन्मपि नष्टम्, आगामिजन्मोऽपीत्त्थमेव विनष्टं भविष्यति।

[सर्वे सभासद: प्रसन्ना भूत्वा, करतलध्वनिना तस्याभिनन्दनं कुर्वन्ति।]

महाराज उदयसिंहऽपि प्रसन्नो भूत्वा तस्मै एक शालं, पञ्चशतस्य स्थाने पञ्च सहस्राणि रूप्यकाणि च ददाति।



**–बी–५९ वीथिसंख्या–३**
**इन्दिरानिकेतनम् ( उत्तरी छज्जूपुरम् )**
**शाहदरा–वेहली–९५**

# कर्मयोगः

-विद्वान्-गणेश ईश्वरभट्टः

**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता॥**

आर्षसंस्कृतवाङ्मयस्य सनातनवैदिकधर्मस्य च मूलं भवन्ति वेदाः। वेदप्रतिपाद्यस्यैव विषयस्य आविष्करणार्थम् उपबृंहणार्थं च वेदाङ्गानि स्मृतिपुराणेतिहासकाव्यानि च प्राणायिषत। तत्र इतिहासकाव्यतया प्रथमाने महाभारते भीष्मपर्वणि श्रीभद्भवद्गीताख्यम् अनितरसाधारणम् अपूर्वं ग्रन्थरत्नं निबद्धम्। धर्मक्षेत्रे कुरुक्षेत्रे, कौरवपाण्डवेषु युद्धाय समुपस्थितेषु सत्सु, अर्जुनः शत्रुपक्षे स्थितान् आचार्यबन्धुमित्रादीन् स्वजनान् कथं हन्यामिति शुशोच। स्वीयं क्षात्रधर्मं परित्यज्य परधर्मे भिक्षाटनादौ रुचिं च स दर्शयामास। तदा धर्मरक्षणाय प्रवृत्तः भगवान् वासुदेवः सर्वलोकोद्दिधीर्षया अर्जुनं निमित्तीकृत्य प्रवृत्तिनिवृत्त्याख्यं धर्मद्वयम् उपदिदेश। स चोपदेशः भगवता व्यासेन गीताख्यैः सप्तशतभिः श्लोकैः ग्रथितः। अत्र च प्राधान्येन वेदान्तार्थ एव प्रकटितः। यथोक्तं–

**''सर्वोपनिषदो गावो दोग्धा गोपलनन्दनः।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥ ''** इति।



किन्तु गीताया अयं विशेषो यदेषा ज्ञानप्रधानस्य वेदान्तशास्त्रस्य प्रस्थानत्रये अन्यतमा सत्यपि, कर्मस्वरूपं सुस्पष्टं प्रतिपादयतीति। तेन अवश्यमेव गीतायां प्रतिपादितं कर्म–ज्ञानमुपकरोतीति ज्ञायते। अस्य कर्मण: निरूपणपर: गीताया: तृतीयोऽध्याय: कर्मयोग इति नाम धत्ते। गीतायामितरेष्वपि अध्यायेषु विषयोऽयं न्यरूप्यत।

कर्म तावल्लौकिकवैदिकभेदेन द्विविधम्। तत्र शास्त्रीयं विधिं विनैव स्वभावत: पुरुषव्यापारविषयी–भूतं कर्म लौकिकं कर्म।'' दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत्'' इत्येवं श्रुतिस्मृतिविहितं यागादिकं वैदिकं कर्म। तच्च पुन: नित्यनैमित्तिकाभ्यभेदेन त्रिविधम्। यत्तु शास्त्रेण निषिद्ध्यमानम् अनर्थहेतुभूतं कर्म, तन्निषिद्धकर्मेत्युच्यते। यथा– ''ब्राह्मणो न हन्तव्य:'' इति। एवं नैकविधत्वं प्रात्ये कर्मणि पुरुष: रागद्वेषदिना प्रेरित: सन् प्रवर्तते। रागद्वेषयोग्य कारणम् अज्ञानमिथ्याज्ञानाद्यपरपर्याया अविधा। अत: यावद्‌विद्योद्‌भूतौ रागद्वेषौ तत्त्वज्ञानेन न नस्यत: तावत् पुरुष: संसारस्य दु:खबाहुल्यम् अजानन्, जानन्नपि दु:खनिवृत्त्युपायम् अज्ञात्वा कर्माण्यनुतिष्ठति। तत: तत्फलोपभोगाय स संसारं चाधिगच्छति। एवं संसारोऽयं कर्मप्रयुक्त:। यथाऽभ्यधायि कर्मलक्षणं भगवत्पादै: ''तत्र संसारतां मुच्यमानानां च कार्यकरणानां स्वकारणसंसर्गे समाने मुक्तानामत्यन्तमेव पुनरनुपादानं, संसरतां तु पुन: पुनरुपादानं येन प्रयुक्तानां भवति तत्कर्म'' इति। गीतायां च निर्दिदिशे 'अद्यस्य मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके'' इति।

लोके केनापि जीवता पुरुषेण कर्मत्यागासम्भवात् सर्वोऽपि नित्यं कर्मसु प्रवर्तत एव। उक्तं च गीतायां '' न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत'' इति। किन्तु प्रागुक्तरीत्या कर्मणां संसारहेतुत्वात्, लोके कस्यापि संसारादस्मात् विमुक्तिरेव न स्यात्। तथा च मोक्षप्रतिपादकशास्त्रस्य वैयर्थ्यप्रसङ्ग। अत: तथा कर्म कर्तव्यं, यथा तत्कर्म संसारं न जनयेत्, मोक्षोपायं चोपकुर्यात्। स च प्रकार: गीतायामुपदिष्ट:। तथा हि

**'' लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ।**
**ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्॥**

इत्युक्तरीत्या, ज्ञानयोग: कर्मयोगश्चेति निष्ठाद्वयं वर्णितं गीतायाम्। तत्र ज्ञानमेव योग: ज्ञानयोग:, कर्मैव योग: कर्मयोग इति विग्रह: ज्ञेय:। ज्ञानयोग: शुद्धान्त:करणानाम् उत्तमाधिकारिणां मार्ग:। तेषां कृते कर्मानुष्ठानं नैवापेक्षितम्। यथा प्रोक्तं गीतायां–

**'यस्त्वात्मरतिरेव स्यादात्मतृत्पञ्च मानव:।**
**आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते॥**'' इति।

इदं च ज्ञानं मोक्षं प्रति साक्षात् साधनं, मोक्षस्य अज्ञाननिवृत्तिरूपत्वेन तं प्रति ज्ञानातिरिक्तस्य कारणत्वासम्भवात्। तथा च श्रुति:'' तमेव विदित्वाऽतिमृत्युमेति नान्य: पन्था विद्यतेऽयनाय'' इति। किन्तु आत्मज्ञानं न सुलभम्। ये नितान्तनिर्मलस्वान्ता: रोहिकामुष्मिकभोगेषु विरक्ता: शमदमादिसम्पन्ताश्च भवन्ति, तेषामेव आत्मज्ञानं ज्ञायते, नान्येषाम्। तर्हि इतरेषां को मार्ग अनुसरणीय इत्याकाङ्क्षायां कर्मयोग उपदिष्ट:। तदुक्तं गीतायाम्–

**''आरुरुक्षोर्मुने योगं कर्म कारणमुच्यते।**

**योगारूढस्य तस्यैव शमः कारणमुच्यते।। ''** इति।

तस्य कर्मयोगस्य मोक्षसाधनत्वं च न साक्षात् किन्तु परम्परया। तथा हि अन्तः करणशुद्धिं बिना ज्ञानं नोत्पद्यते ''ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः'' इति स्मृतेः। अन्तःकरणशुद्धि कर्मभिः सम्पादनीया। कथं तर्हि कर्मणः बन्धहेतुत्वं बन्धनिवर्तकत्वं चेत्युभयमपि सङ्गच्छत इति चेदित्थम्– लौकिकेषु वैदिकेषु च कर्मसु प्रवर्तमानः पुरुषः 'अहमस्य कर्मणः कर्ता, इदं कर्म कृत्वा अस्य फलमनुभविष्यामि' इत्यभिमन्यते। तस्य सर्वाः प्रवृत्तयः कर्तृत्वबुद्धिपूर्विकाः फलेच्छापूर्विकाश्च भवन्ति। एवं पुरुषः कर्मणि कर्मफले वा सज्जते। किन्तु ''असङ्गोऽह्ययं पुरुषः'' ''न लिप्यते लोकदुःखेन बाह्यः'' इत्यादिश्रुतेः आत्मा कर्तृत्वभोक्तृत्वादिधर्मैः न संसृज्यते। एवं सति कर्तृत्वादिकं किम्प्रयुक्तमिति जिज्ञासायां, अन्तःकरणाद्यनात्माध्यासप्रयुक्तमिति स्पष्टमुत्तरम्। यदकथ्यत गीतायां–

**'प्रकृते क्रियमाणानि गुणै' कर्माणि सर्वशः।**

**अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते।। ''** इति।

प्रकृतेः गुणैरित्यस्य मायाविकारभूतैः शरीरेन्द्रियादिभिः इत्यर्थः।

एवं फलाभिसन्धिपूर्वकं कर्तृत्वबुद्धिपूर्वकं च यः कर्माणि करोति, तेनैव क्रियामाणानि कर्माणि बन्धहेतवो भवन्ति। ''अयुक्त कामकारेण फले सक्तो निबध्यते'' इत्युक्तेः। यस्तु पुनरात्मानात्मविवेक–सम्पन्नः, तेन क्रियमाणं कर्म कर्तृत्वबुद्ध्या फलेच्छया च वर्जितम्। अनात्मभूतानि शरीरेन्द्रियादीनि स्व–विषयेषु प्रवर्तन्ते, तादृशप्रवृत्तिरेव तेषां स्वभावः आत्मा तु अकर्ता, देहेन्द्रियादिव्यापारेण स न लिप्यते इत्ययं विवेकी जानाति। यथोक्तं–

**'' प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।**

**यः पशति तथाऽत्मानमकर्तारं स पश्यति।।''** इति।

अतः कर्तृत्वबुद्धिरहितः विवेकी केवलं ममेदं कर्तव्यमिति बुद्ध्या कर्माण्यनुतिष्ठति। कर्तृत्वस्यैव अभावे आत्मा कथं भोक्ता स्यात्। अतः कर्मफलानिच्छन् ज्ञानी कर्मफले न सज्जते। किन्तु ''सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते'' इत्युक्तरीत्या कर्मफलस्य लाभे अलाभे वा स समचित्र एव तिष्ठति। अस्मिन्नर्थे गीतायां सन्ति बहवः श्लोकाः। यथा–

**'' न हि देहभूतां शक्यं व्यक्तुं कर्माण्यशेषतः।**

**यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते।।**

**कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन।**

**सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्विको मतः।।**

**नियतं सङ्रहितमरागद्वेषतः कृतम्।**

**अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते।।''** इति।

अहङ्कारफलेच्छारहितः ईश्वरार्पणबुद्ध्या कर्माण्यनुतिष्ठति। 'अनेन कर्मणा परमेश्वरः प्रीयताम्' इति स सर्वाणि कर्माणि भगवति समर्पयति। ततस्तत्कर्म चित्तशुद्धि द्वारा ज्ञानोत्पत्तौ कारणं भूत्वा बन्धं

विमोचयति। उक्तं हि'' यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः'' इति। अत्र यज्ञशब्दः परमात्मपरः, 'यज्ञो वै विष्णुः' इति श्रुतेः। यज्ञदानादिकर्मणां ब्रह्मज्ञाने विनियोगं दर्शयति श्रुतिः ''तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञने दानेन तपसाऽनाशकेन'' इति। अत एव कर्मयोग इत्यत्र युज्यते अन्तःकरण– शुद्धया अनेन इति योगशब्दस्य व्युत्पत्तिः। अत्र युजिर् योगे इति धातुः। पातञ्जलशास्त्रे तु योगशब्दः 'युज समाधौ' इति धातुना निष्पन्नः। चित्तशुद्ध्यर्थं कर्मसु प्रवर्तमानः पुरुषः आत्मयाजीति श्रुतिषु व्यपदिष्टः। अनेन क्रियमाणानां कर्मणां कर्मयोगरूपत्वात्, अयं गीतायां कर्मयोगी, योगी, युक्त इति व्यपदिस्यते। सोऽयं कर्मयोगः ब्रह्मप्राप्तिरूपं मोक्षं प्रति परम्परया साधनत्वेन एवमभिहितः गीतायां–

**''युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्**
**कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।**
**योगिनः कर्म कुर्वन्ति सङ्गं व्यक्त्वात्मशुद्धये॥**
**ब्रह्मण्याधाय कर्माणि सङ्गं व्यक्त्वा करोति यः।**
**लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥**
**सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः**
**मत्प्रसादादवाप्नोति शास्वतं पदमव्ययम् ॥** '' इति।

एवं गीतामवलम्ब्य विचार्यमाणे, ज्ञानरहितं कर्मसन्यासमात्रं न किञ्चिदपि साधयति। अशुद्धचित्तैः अज्ञानिभिः पुरुषैः कर्म अवस्यं कर्तव्यम्। किन्तु तत्कर्म कर्मयोगरूपं स्यात्। जनकादयः एतादृशकर्मयोगिन आसन्निति गीता कथयति। ''कर्मणैव हि संसिद्धिमास्थिता जनकादयः '' इति। कर्मयोगमार्गे क्रियमाणानि कर्माणि ''सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते'' इत्युक्तं कर्मणां परमं लक्ष्यं साधयन्ति। अतः ज्ञानस्य अन्तरङ्गसाधने संन्यासे अनधिकारिणां श्रेयःकाङ्क्षिणां कृते कर्मयोगः सुलभोपायः। अत एव गीतायां क्वचित् ''यं सन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव'' इति कर्मयोगस्य सन्यासमानत्वं, क्वचित् ''तयोस्तु कर्मसन्यासात् कर्मयोगो विशिष्यते'' इति कर्मयोगस्यैव श्रैष्ठयं च कथयित्वा तस्य स्तुतिः अक्रियत। कर्मयोगस्य प्राशस्त्यमालक्ष्य गीतायां स एव कर्तव्यतया बहुत्र उपदिष्टः। यथा–

**'' एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।**
**कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्।**
**असक्तो ह्याचरन् कर्म परमाप्नोति पुरुषः॥**
**यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।**
**यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥**'' इति।

ज्ञानिना क्रियमाणमपि कर्म कर्मयोगसदृशम् कर्तृत्वबुद्धिफलासक्त्योः अभावात्। यद्यपि लब्धब्रह्मसाक्षात्कारेण तेन क्रियमाणं कर्म अन्तःकरणशुद्धावपि नोपयुज्यते, तथापि, अज्ञाननिः कर्म न त्यजेयुः इति स कर्मणि प्रवर्तते। अयमेव लोकसङ्ग्रह इत्युच्यते यथोक्तं–

"सक्ताः कर्माण्य विद्वांसो यथा कुर्वन्ति भारत।
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसङ्ग्रहम्॥" इति।

**वर्तमाने कर्मयोगस्य उपयोगिता –**

वर्तमानकाले, गीतायां प्रतिपादितस्य कर्मयोगस्य उपयोगिताया अंशा एवं विभक्तुं शक्यन्तेः–

**( अ ) फलासक्तेरभावः–**

कर्मयोगस्य प्रथमो विशेषः फलासक्तिराहित्यम्। "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" इति गीतायाः सुस्पष्टः सन्देशः। वर्तमाने तावज्जनाः कर्मारम्भसमये, कर्मणोऽस्य फलं किं, तच्च कदा लभ्यते इत्येव चिन्तयन्ति। कर्मानुष्ठानस्य आदौ, मध्ये अन्ते चेति सर्वदा तेषां मनः कर्मफले सज्जते। तत्र कर्मफलस्य प्राप्तौ हर्षोत्मत्ताः, ततोऽधिकं फलं कामयमानाः रागद्वेषादिदूषिताः मनःशान्तिं न प्राप्नुवन्ति। फलस्य अलाभे तु निराशाः निरुत्साहिनः क्रोधाभिमूता वा उद्विजन्ति। एतादृशस्थितौ फलासक्तेः अभावं बोधयन् कर्मयोगः कर्मिण उपकरोति। स च "न प्रहृष्येत प्रियं प्राप्य नोद्विजेत् प्राप्य चा प्रियम्" इत्युक्तरीत्या फलस्य लाभे अलाभे च समत्वं संरक्षति।

**( आ ) अहङ्कारा भावः–**

अद्य जनेषु कर्तृत्वाभिमानः भूयान् दृश्यते। स्वस्थ कर्तृत्वम् अभिमन्यमानाः जनाः तस्य प्रकाशनार्थं बहुधा यतन्ते। किन्तु तादृशकर्मणा स्वस्थ इतरेषां वा उपकारो भवतीति न निश्चयः। प्रत्युत, ये तादृशकर्मणि अशक्ताः, ते स्वीयामशक्तिं चिन्तयन्तः दुःखिताः भवन्ति। गीता तु, परमार्थतः सर्वेषाम् आत्मस्वरूपेण अकर्तृत्वात् कर्तृत्वाभिमानः सुखं न जनयतीति कर्तृत्वाभिमानं त्याजयति। एवं कर्मयोगः कर्तृषु अकर्तृषु च सभत्वभावस्य विकासे साहाय्यम् आचरति।

**( इ ) कर्मणाम् अवश्यकर्तव्यत्वम् :–**

केचन पण्डितम्मन्या अद्य श्रौतस्मार्तकर्माणि निन्दन्तो दृस्यन्ते। कर्मणां बन्धहेतुत्वमात्रं मन्यमानाः ते सन्यासे अनधिकारिणः सन्तोऽपि कर्म त्यजन्ति, अन्यान, व्याजयितुं च प्रवर्तन्ते। गीतायां बोधितः कर्मयोगः अज्ञानिभिः अवस्यमनुष्ठेयं कर्म इत्युद्घोषयति। सर्वथा भोगेषु विरक्तानां शुद्धान्तः करणामेव कर्मत्यागे अधिकरः, नेतरेषाम्। कर्मत्यागमात्रेण न ज्ञानं प्राप्यते, न शान्तिः लभ्यते, न वा मोक्ष प्राप्यते। मोहात्तस्यादिभिः कर्मत्यागस्तु तामसः। अतः कर्मयोगरूपेण कर्म अवश्यम् अनुष्ठेयम्। तदेव पर्यवसानभूभौ नैष्कर्म्यं साधयति।

**( ई ) त्यागभावः –**

अद्य समाजे सर्वत्र स्वार्थभावः बोभवीति। गीतायाम् उपदिष्टः कर्मयोगस्तु त्यागभावं बोधयाति। कर्मयोगी ईश्वरे सर्वकर्माणि सर्मपयति। अतस्तस्य ममदेम् इति भावना निवर्तते।

**( उ ) लोकसग्रंहः–**

ज्ञानिनाऽपि लोकसग्रहार्थं कर्म कर्तव्यम् इति गीता निर्दिशति। लोकसङ्ग्हो नाम लोकस्य उन्मार्ग–प्रवृत्तिनिवारणम्। ज्ञानिना क्रियमाणं कर्म हि कर्तृत्वाभिमानफलासक्तिवर्जितम्। तं कर्मानुष्ठातारम् अनुसरन्तः जनाः स्वयमपि स्वेषु कर्मसु प्रवर्तन्ते। एवं कर्मानुष्ठाता समाजमुपकरोति। अत एव स्वयं गीताचार्यः भगवान् कृष्णः कर्माणि न तत्याज।

**( ऊ ) सर्वकर्मणां समानत्वम् –**

लोके सर्वैरपि एकमेव कर्म कर्तुं न शक्यते। विभिन्नैः पुरुषैः तत्तद्देशकालवयः कुलादि भेदेन भिन्नसजातीयं कर्म अनुष्ठीयते। सम्प्रति तु केचन मम कर्म तुच्छं किमनेन प्रयोजनमिति खिन्नाः दृश्यन्ते। किन्तु गीता सर्वाण्यपि कर्माणि समानानि इत्युपदिशति। ''स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते पराम्'' ''स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः'' इति सर्वेषामपि कर्मणां परम्परया श्रेयस्साधनत्वं प्रत्याययति। अयमुपदेशः, खेदं विदाय जनानां स्वकर्मसु प्रवृत्तिं जागरयति।

एवमवस्यनुष्ठेयं कर्म न व्यक्तव्यं, किन्तु तत्कर्म यथा बन्धं न जनयेत् तथा कर्तव्यमिति कर्मयोग परस्य गीतायाः सन्देशः। श्रीशङ्करभगवत्पादाः अमुमेवार्थमालक्ष्य'' तत्कर्म यत्र बन्धाय'' इति कर्मयोगपरतया कर्मलक्षणं प्रोचुः। स्वयं भगवान् ''योगः कर्मसु कौशलम्'' इति कर्मयोगं प्रशशंस। गीतायाम् उपदिष्टः कर्मयोगः सार्वकालिकः। अत एव गान्धीतिलकप्रभृतयः आधुनिका अपि गीतां नितरां मानयामासुः। विशिष्य सम्प्रति रागद्वेषप्रभावतः प्रज्ञाहीनतां गतस्य प्रपञ्चस्य कर्मयोगः सञ्जीवनौषधिः।

**मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम्।**
**यत्कृपा तमहं वन्दे परमानन्दमाधवम्॥**


**–प्राध्यापकः , अ. वेदान्तविभागः,**
**राष्ट्रिय संस्कृत संस्थानम्**
**( मानितविश्वविद्यालयः )**
**राजीवगान्धी परिसरः, शृङ्गेरि,**
**चिक्कामगलूरु, कर्नाटकाराज्यम्**

# पर्यावरणम्

-डॉ. सुन्दरनारायणः झा

( अनुष्टुप )

वरणार्थकवृञ्धातोः परि-आ-इत्युपसर्गयोः।
पर्यावरणशब्दोऽयं निष्पन्नो भवतीह भोः ॥१॥
परितो विद्यमानं सद् यदावरणमस्ति तत् ।
पर्यावरणमित्युक्तं शब्दशास्त्रविचक्षणैः ॥२॥
आपो वातास्तथा चेमा औषधयश्च देवताः।
पर्यावरणसम्बद्धाः घटकास्ताः प्रकीर्तिताः ॥३॥
द्युलोकादागता एताः धरण्यां प्राणदाः स्मृताः ।
परितो विद्यमानास्ताः पर्यावरणसंज्ञिकाः ॥४॥
त्रीण्येव मण्डलान्यत्र जलवायुस्थलानि च।
तैरावृतमिदं सर्वं जगदस्ति चराचरम् ॥५॥
कुर्युः संरक्षणन्तेषां संसारे सर्वमानवाः।
तैरेव जीवनं लोके स्यादस्माकं सुरक्षितम् ॥६॥
अपां पानं विना नास्ति जीवनं लोकविश्रुतम्।
वायवश्चापि जीवेभ्यः सन्ति मुख्याः धरातले ॥७॥
अन्नादीनान्तु भोगेन देहे तिष्ठति जीवनम्।
नान्नं विनाऽत्र केषाञ्चिन्मानवानां हि संस्थितिः ॥८॥
तस्मात्सर्वप्रयत्नेन त्रिदेवाराधनं सदा।
यज्ञयोगविधानेन सर्वे कुर्वन्ति देहिनः ॥९॥
जलमापस्तथा वायुर्वातशब्देन बोधितः।
ओषं प्राणं धयेत्यस्मादौषधीः प्राणपोषिकाः ॥१०॥



( शिखरिणी )

समस्तं ब्रह्माण्डं पवनजलवृक्षैः परिकरै-
रभिव्याप्तं जातं परमरमणीयं निवसितुम्॥
विलोक्यैमां शोभाममरपतिलोकात्सुरगणाः
जले वायौ स्थित्वा तृणकणविरूपाः समभवन् ॥११॥

हरिश्चापो भूत्वा सकलभुवनेष्वाप्तपरमः
सुरज्येष्ठो व्याप्तः पवनविधया सर्वतनुषु ।
वनस्पत्यौषध्यो विषमवनिजातं प्रतिपलं
पिबन्त्येतद्रूपं भवति शिवतुल्यं सुखकरम् ॥१२॥

विषं पीत्वा नित्यं बहुविधमपायं हरति यत्
प्रयच्छन् प्राणं तत् सकलभुवनानां पशुपतिः ।
त्रिदेवानामेषां भवतु बहुपूजा विधियुता
धरण्यां कल्याणं सकलमपि तत्रैव निहितम् ॥१३॥

(इन्द्रवज्रा)

पुरा सुरेभ्यः त्रियुगं प्रसूताः
बृहस्पतेर्देवगुरोः सकाशात् ।
चतुर्विधास्ताः फलिनीरपुष्पाः
फलैर्विहीनास्तदु पुष्पिणीश्च ॥१४॥

समस्तपापात्प्रतिमुञ्चयन्त्यो
मातेव पुत्रान्परिपालयन्ति ।
भवेत्प्रयत्नं खलु नः समेषां
सदैव तासां परिरक्षणार्थम् ॥१५॥

**-सहआचार्यो वेदविभागे,**
**श्रीलाल बहादुर शास्त्री केन्द्रीय विश्वविद्यालयः,**
**कुतुबसांस्थानिकक्षेत्रम्, नव देहली-९६**

# नन्दिनी

–महावीरप्रसादः शर्मा

**नेपथ्यकथनम् –**

**या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता**
**नमस्तस्यै नमस्तस्यै, नमस्तस्यै नमो नमः।**

नारी निर्बला न भवति। स तु शान्तिरूपा भवति। यदा नारी निजशक्तिरूपं परिचिनोति तदा तस्या अग्रेकोऽपि दुर्जनः स्थातुं न शक्नोति अस्मिन् 'नन्दिनी' नाम्नि लघुनाटके महिलासशक्तीकरणमेव केन्द्रबिन्दुरूपेण परिस्फुटितम्। या देवी सर्वभूतेषु..........................।

**प्रथम–दृश्यम्**

(स. सहशिक्षा–महाविद्यालये वार्षिक–पुरस्कार–वितरण–समारोहावसरः, राज्यस्तरीय महिला–हॉकी–क्रीड़ा–प्रतियोगितायां महाविद्यालयस्य अस्य दलं प्रथमं स्थानम् अजैषीत्। हॉकीदलस्य नेत्री कु.नन्दिनी स्वदलसहिता समुपस्थिता। महाविद्यालयस्य सभागारे व्यवस्थिलसभायाः दृश्यम्)

**प्राचार्यः**– मान्याः मुख्यातिथिमहोदयाः, शिक्षकाः प्रियछात्राश्च अद्य अस्माकं महाविद्यालयस्य वार्षिकोत्सवः अथ च–पुरस्कार–वितरणोत्सवः। अत्राहं सर्वेषाम् उपस्थितानां स्वागतम् अभिनन्दनं च करोमि। अस्माकं महाविद्यालयस्य हॉकीदलं राज्ये सर्वप्रथमं स्थानं प्राप्तवान–इति हर्षस्य विषयः। अस्माकं हॉलीदलस्य नेत्री कुमारी नन्दिनी बी.ए. तृतीय–वर्षीय छात्रा अस्य विजयस्य श्रेयोभागिनी वर्तते। अतः सर्वप्रथमम् अहं कु. नन्दिनीमेव विजयोपहारग्रहणाय आवाहयामि। नन्दिनी स्वहॉकी दलसहिता अत्रमञ्चे समागत्य, मुख्यातिथिमहोदयानां करकमलेभ्यः साभिनन्दनं पुरस्कारं स्वीकरोतु।

(हॉकी–क्रीड़क गणवेश युक्त कुमारी नन्दिनी स्वदलसहिता मंचमारूंध्य पुरस्कारं गृह्णाति)

**प्राचार्यः**– कु. नन्दिनी न केवलं क्रीडाक्षेत्रे प्रत्युत अध्ययऽपि प्रखर–प्रतिभाशालिनी वर्तते। एत बी.ए. द्वितीय वर्ष परीक्षायां विश्वविद्यालये प्रथमं स्थानम् अधिगतम्। तदत्रापि सा प्रथमं पुरस्कारं पदकं च प्राप्तुं पुनरत्रागच्छतु। (नन्दिनी यथोक्तम् अनुसरति।)

**प्राचार्यः**– क्रीडाक्षेत्रें अध्ययने च विशिष्ट–प्रतिभाशालिनी कु. नन्दिनी अस्मिन् वर्षे महाविद्यालयस्य आदर्श छात्रा रूपेणापि चयनम् अत अत्रापि सेयं समागत्य पुरस्कार प्राप्ता गृहणातु।

**(नन्दिनी–यथोक्तम् अनुसरति)**

**प्राचार्यः –** नन्दिनि, अपि नाम त्वम् अस्मिन् विषये किमपि, वक्तुं सन्देष्टुं वा कामयसे!

**नन्दिनीः –** आम्, श्रीमन्, अहं वक्तुम् इच्छामि किमपि।

**प्राचार्यः –** तर्हि आगच्छ, स्वागतं ते।

**नन्दिनीः –** (मञ्चमागत्य) मान्याः मुख्यातिथयाः, प्राचार्यमहोदयाः, पूज्यशिक्षकाः, प्रियसहपाठिनश्च, सर्वगुणयुक्तोऽपि एको जनः न किमपि कर्तुं शक्नोति, सदा संघे एव शक्तिर्भवति। अतः हॉकीक्रीडायामां नाहम् एकाकिनी श्रेयो भाजिनी, मम दल स्थिताः सर्वा अपि छात्राः समानरूपेण श्रेयोभागिन्यो वर्तन्ते। सर्वासां सम्मिलितप्रयासेनैव विजयः प्राप्तः। न केवलं क्रीड़ाक्षेत्रे वरं परिवारे, समाजे देशेऽपि संघीभूय प्रयासेनैवः साफल्यम् उन्नतिश्च प्राप्यते। अतः मम इदमेव कथनमत्र यत् सर्वदा समे विषमे अपि सर्वैरेकीभूय स्थातव्यम्)

जयतु भारतम् इति।

## द्वितीय-दृश्यम्

(ततः प्रविशति स्व-दौर्जन्य-बले गर्वितः, अत्युद्धत वचोवेषः, महाविद्यालयस्य कुख्यातछात्रः दुर्जनासिंहः।)

**दुर्जन सिंहः–**(सोन्मदं परिक्रम्य) हंहो, पुरस्काराणि प्रदीयन्ते, अभिनन्दनं क्रियते छात्रिकाणां यशोगानं गीतये, आदर्श-छात्राः घोष्यन्ते, सर्वं व्यर्थम् आडम्बरम्। अस्य महाविद्यायलस्य वरिष्ठः, बलिष्ठः, सर्वोत्तमछात्रस्तु अहं दुर्जन सिंहः। नात्र कोऽपि ममाग्रे स्थातुमर्हति। केयं वराकी नन्दिनी, निर्धनशिक्षकस्य पुत्री नन्दिनी। कदाचिदहम् अस्याः गर्वम् चूर्णयिष्ये। अहं यद्यपि बी.ए कक्षायां बहुबारम् अनुत्तीर्णः, परं किं तर्हि। पठनं-पाठनं व्यर्थमेव। बहुपठिताः भीर व एव भवन्ति। इमे तु भृत्यायै पठन्ति। नाहं भृत्याम् इच्छामि। अहं स्वामी, न तु भृत्यः। मम पिता धनिष्ठः। अहम् विधायकस्य श्यालकः। विधायकः मम भगिनीपतिः। सर्वेऽत्र मम वशंवदाः। सर्वे ममाज्ञावर्तिनः। छात्रसंघस्य प्रधानोममानुचरः। मम इच्छाविरुद्धं य आचरेत् न स भवति। अहं बाहुबली। हा, हा, हा .................. (साट्टहासं हसति)

यावदत्र चायपान स्थानं प्रविश्य सुन्दरीणां छात्राणाम् अवलोकनं करोमि। (प्रविश्य) हा, हा, हा माम् विलोक्य सर्वे छात्राः हतप्रभाः जाताः।

**अहं बलिष्ठोऽस्मि तथा वरिष्ठः**
**विधायकाऽसौ भगिनी पतिर्मे।**
**न कोऽपि मेऽत्र प्रतिरोधकर्ता**
**यथाऽहमिच्छामि तथाऽचरामि ॥१॥**

(सर्वेछात्राः ससम्भ्रममाकर्णयन्ति)

**दुर्जनसिंहः–** (एकेन छात्रेण सह उपविष्टां छात्रामुपगत्य) असे सुन्दरि, अनेन कृपणेन सह उपविशसि, कदाचिन् मया सहापि चायं पिब, धन्या भविष्यसि।

**छात्रः –** (साहसेनोत्थाय) दुर्जनसिंह इयं मम भगिनी।

**दुर्जनसिंहः–** (उच्चैर्हसित्वा) भगिनी तु तवैवास्तु, अहं तु सहचायपानाय मैत्रीकरणाय च कथयामि।

**छात्रः –** भो दुर्जन सिंह, नैवं छात्रासु व्यवहर्तव्यम्।

**दुर्जनः–** तदेवं त्वं मां व्यवहारं शिक्षयसे

(बलात् गृहीत्वा पृष्ठतः क्षिपति)

न खलु दुर्जनसिंहः प्रतिरोधं सहते (पुनश्च छात्राम्प्रति) सुन्दरि, किं ते नाम!

(छात्रा भयेन कम्पते, दुर्जनश्चभीतायाः तस्याः पटप्रान्तं गृह्णाति, छात्रा च स्वावरणं विहाय रुदन्ती बहिर्धावति दुर्जन सिंहः उच्चैर्हसति)

**नन्दिनी –** (सहसा प्रविश्य रुदन्तीं छात्रां समाश्वासयन्ती) सुरेखे, किं जातम्, कथं रोदिषि! (वहिर्निर्गच्छन्तं दुर्जन सिंह विलोक्य अथवा किं कथितेन मया ज्ञातं सर्वम्, एहि त्वां प्राचार्यस्य कार्यालयं नयामि,

(सम्मुखमागच्छन्तं छात्रसंघ प्रधानं दृष्ट्वा)

भो महाशय, छात्रसंघप्रधान, किमिदम् त्वयि स्थिते दुर्जनसिंहः छात्रासु दुर्व्यवहरति।

**छात्रसंघ प्रधानः–** नन्दिनि! नाहं किमपि कर्तुं शक्नोमि। दुर्जन सिंहस्य साहाय्ये न एवाहं निर्वाचितः अभवम्। सर्वं धनादिकं तेनैव व्ययितम्। अत एव वशंवदोऽहं तस्य। कृपया क्षम्यताम्।

**नन्दिनी –** तदा तु छात्रसंघस्य निर्वाचिनमेव व्यर्थं भवता। का पुरुषस्त्वम् यदेवं विधमत्याचारं दृष्ट्वापि मौनम् आलम्बसे। धिक् त्वां पुरुषम्मन्यम्।

**छा.सं.प्र.–** किमपि कथयितुं स्वतन्त्रा भवती, विवशोऽहम्।

**नन्दिनी–** एहि, सुरेखे प्राचार्यं शरणं गच्छावः, स एव दण्डयतु दुर्जनम्।

**( प्राचार्यकक्षं प्रविश्य )**

महोदय, दिने दिने वर्धते दुराचरणं दुर्जनस्य, मदिरालयीकृतं तैन विद्यामन्दिरमिदम्। अद्य समक्षम् एव सर्वछात्राणां सुरेखायाः प्रावरणम् अपसारितं तेन। सद्य एव संस्थातो निष्कासयितव्यः असौ।

**प्राचार्यः –** नन्दिनी, त्वं मम पुत्रीवद् वर्तसे। दुर्जनसिंहस्य दुराचारेण सर्वथा कलंकितोऽयं महाविद्यालयः तं बहुधा निष्कासयितुम् इच्छामि, परं किं करोमि। बाहुबली विधायकः अस्य भगिनीपतिः वर्तते। सर्वे अधिकारिणः रक्षिणश्च तस्माद् भीताः सन्ति। किमधिकम्, पत्रकाराः अपि तस्यैव यशो गायन्ति। प्राचार्यपदे मम नियुक्तिरपि तस्यैव शीर्षादेशेन जाता। अतो मम विवशतां जानीहि।

**नन्दिनी–** महोदय, यदि सुरेखायाः स्थाने भवतां पुत्री स्यात्।

**प्राचार्यः –** तदाऽप्यहं मौनं सर्वसहोऽभवम्।

**नन्दिनी –** आगच्छ, सुरेखे, न कोऽपि अत्र अस्माकं त्राता सहायको वा।

(सुरेखया सह प्राचार्यकक्षाद् बहिर्याति, बहिः स्थितं दुर्जनसिंहञ्च कुटिलहासयुतं पश्यति)

**दुर्जनसिंहः–** नन्दिनि, स्वकीया नेतृत्वलालसा पूरिता त्वया, मदीया शक्तिश्च दृष्टा। अधुना त्वामपि

द्रक्ष्यामि। मया सह विरोधो बहु पश्चात्तापकरो भवति।

(नन्दिन श्रुत्वापि तमुपेक्ष्य सुरेखया सह छात्राकक्षं प्रविशति)

**नन्दिनी –** (कक्षस्थ छात्राः सम्बोध्य)

प्रियभगिन्यः, सर्वे धूर्ताः पाखण्डिनः, क्रीतदासाश्च सन्ति। न कोऽपि रक्षकोऽस्माकम्। अस्मदीयाः पितरः भ्रातरोऽपि लज्जाभीरवः संकट भीरवश्च सन्ति। आत्मरक्षैवोपायः। अद्य सुरेखा श्वो वयम्। अधुना स्वाभिमानस्य रक्षायै करणं वा मरणं वा।

**सर्वाः छात्राः –** करणाय वा मरणाय सज्जाः वयम्।

**नन्दिनी–** बुद्धिबलेन बाहुबलं जीयते। मया छात्रसंघ प्रधानस्य, प्राचार्यस्य च ध्वनिरत्र ध्वनियन्त्रे नियन्त्रितः। श्वः सर्वाभिरेव सज्जीभूय महाविद्यालये समागन्तव्यम् श्व एवास्माकं शक्ति–परीक्षणं भविता।

## अन्तिमं दृश्यम्

(ततः प्रविशति दुर्जन सिंहः)

**दुर्जन सिंहः–** महाविद्यालयस्य छात्रास्तु मया सर्वे नपुंसकीकृताः परमिमाः छात्रिकाः समुच्छलन्ति, विशेषतः नन्दिनी। अथवा किं सा। परं सुरेखा तु मम हृदये मग्ना तां न त्यक्ष्यामि। (सहसा विलोक्य) अये किमिदमाश्चर्यम्। इयं पुरतः कक्षद्वार स्थिता सुरेखा सुमन्दस्मिता मां संकेतेन आवाहयति। कथमेतत्। अथवा युवतीनां मनः स्थितिं वस्तुतः को जानाति। भाग्यमद्यानुकूलम्। यावत् द्रुतं तामुपसर्पामि।

(सुरेखा दुर्जन सिंहमुपायान्तमवलोक्य कक्षान्तः प्रविशति, गृहीत संकेतश्च तत्रैव दुर्जन सिंहोऽपि)

**दुर्जनसिंहः–** प्रिये सुरेखे, अहमागत एव त्वां बाहुपाशेन बद्धुम्। एहि, एहि।

(सहसा कक्ष द्वारमावृतं भवति, पञ्चषाश्च हाकीहस्ताः छात्राः प्रकटी भवन्ति)

**दुर्जन सिंहः –** अहो, किमिदम्, कुत्र सुरेखा!

**नन्दिनी –** (पटान्तरात् प्रविश्य)

**दुर्जन सिंहः–** नात्र सुरेखा, तवात्र मृत्युः।

**पश्य रे नीच! रे दुष्ट, दुर्जन, विद्यायकनामदृप्त,**
**नारीजनं समवमान्य कुतः प्रयासि!**
**भोक्तव्यमेव कुफलं त्वयका कृतस्य**
**पादौ, करौ ननु तवाद्य भिनद्भि मूढ!**

**दुर्जनसिंहः–** अहो, अध्यापक पुत्रिके! तवेदं प्रवञ्चनम्।

**नन्दिनी–** शठस्तु शाठ्येनैव भ्रियते।

**दुर्जनः–** (पटान्तर्गतां छुरिकां विनिष्कास्य) हे मूढबालिके–

**नन्वेक एव सुदृढोऽस्मि कुरु प्रहारं**
**सर्वाः विहन्तुमिह वञ्चनयाऽनया किम्,**
**मृग्यो भवन्ति सफलाः मृगराजघाते-**
**बह्व्योऽपि किं, खलु करोषि वृथैव दर्पम् ॥३॥**

तत् पूर्वं त्वामेव हनिष्ये (छुरिकां सन्धाय समुत्पतति)

**नन्दिनीः -** (उग्रहॉकी प्रहारेण छुरिकां परतः समुच्छाल्य) रे मुर्ख भुक्ष्व स्वकृतम् (इति सवेंग प्रहरति परितश्च सर्वाः छात्राः प्रहरन्ति)

**दुर्जनसिंहः-** (सर्वतः प्रहृतः रक्ताप्लुतः भग्नशरीरः मुखाद् रुधिर वमन्) हा, हा, हतोऽस्मि रे, रक्षत मां-रक्षत मां!

**नन्दिनी-** रे रे छात्र कलंक, पामर, अघ कोऽपि विधायकः कोऽपि उच्चाधिकारी, कोऽपि अधीक्षकः त्वां रक्षितुं न शक्नोति। तव दुष्टाः सहचराः अपि प्रगताः (पादयोः प्रहृत्य) सहस्व प्रहारम्।

**दुर्जन सिंहः -** नन्दिनि, क्षमस्व मां , त्वं मदीया भगिनी, सुरेखा मम लघुभगिनी क्षमस्व दुष्ट भ्रतरम्, सर्वाः छात्राः, मम भगिन्यः, क्षमस्व, क्षमस्व प्राणदानं देहि, प्राणभिक्षां याचे मुञ्चत मां भगिन्यः! (नन्दिनी तस्य वक्षसि पादं विन्यस्य स्थिता या देवी सर्व भूतेषु शक्ति रूपेण .............)

**पटाक्षेपः**

**- ३१७ सैक्टर ७ यू ई**
**करनालः ( हरियाणा )**

# कौटिल्यसम्मता गुप्तचरव्यवस्था

-प्रो. मानसिंहः

आचार्यकौटिल्येन स्वीयेऽर्थशास्त्रेऽमात्यादीनामितरजनानाञ्च हार्दिकभावदुरभिसन्धिकपटाचरणादीनां परीक्षणाय राज्ञा स्वराज्ये योग्य गुप्तचरनियोगो विधातव्य इति समुपदिष्टम्। धर्मार्थकामभयाद्युपधाभिः परीक्षितान्संशुद्धानमात्यानेव राजकर्मसु राजोपयोजयेत्। अर्थ-शास्त्रे कापटिकौदास्थिगृहपतिकवैदेहकतापससत्त्रितीक्षण रसदभिक्षुकीप्रभृतयो बहुविधाश्चराश्चर्चिताः। तत्र परमर्मज्ञः प्रगल्भः छात्रः कापटिकः प्रवृज्याप्रत्यवसितः प्रज्ञाशौचयुक्त उदास्थितः, कषर्क-वृत्तिर्गृहपतिः वणिक्कर्मव्यापृतो वैदेहकः, **मुण्डो जटिलो वा तापसः**, लक्षणमङ्गविद्यां जम्भकविद्यां मायागतमाश्रमधर्मं निमित्तमन्तरचक्रञ्चाधीयानाः सत्त्रिणः शूरा द्रव्यहेतोर्हस्तिव्यालादिप्रतिशोधपरास्तीक्ष्णाः, बन्धुष्वपि निःस्नेहाः क्रूराश्चालसाश्च रसदाः दरिद्राः परिव्राजिका मुण्डाश्च भिक्षुक्यः। न केवलं राज्य एवापि तु स्वान्तःपुररक्षणार्थमपि कुब्जाः वामनाः क्लीबाः शिल्पवत्यः स्त्रियो मूकादयश्च म्लेच्छजातयोऽन्तर्गृहचरा नियोक्तव्याः। दुष्टान्प्रति नित्यं जागरूकस्य, सर्वानिष्टापनोदनक्षमस्य, शात्रवमाचरतां जनानाञ्चनिरोधकस्य विनाशकस्य च चारचक्षुषो भूभृत एव प्रशासनं शासनञ्च निरुपद्रवं भवति। प्राचीने भारते गुप्तचरव्यवस्था सुतरां सुदृढेत्यर्थशास्त्रं कौटिल्यप्रणीतं प्रमाणयति।

-पूर्व आचार्यः,
कुरुक्षेत्र विश्वविद्यालयः,
कुरुक्षेत्रम् ( हरियाणा )

# जलियांवाला-बाग-हत्याकाण्डम्

-दिनेशचन्द्रः

जलियांवालाबागहत्याकाण्डं भारतस्य पञ्जाबप्रान्तस्य अमृतसरे स्वर्णमन्दिरस्य निकटे जलियांवालाबागस्थाने अप्रिलमासे १३दिनांके १९१९तमवर्षे बैसाखीदिने अभवत्। रौलेट-एक्ट-विरोधाय तत्र सभा जायते स्म यत्र जनरलडायराख्यः आङ्ग्लीयाधिकारी अकारणं सभायां गुलिकाप्रहारान् अकुर्वन् तत्र चतुर्शताधिकजनाः मृत्युमुपागताः अपि च द्विसहस्राधिकजनाः व्रणिताः। ब्रिटिशराजाभिलेखे अभिलिखितं यत् तत्र २००जनाः व्रणिताः अपि च ३७९जनाः हुतिंगताः येषु ३३७पुरुषाः ४१किशोराः षडमासात्मकश्च शिशुरपि एक आसीत्।

अनाधिकारिकाङ्कानुसारं १००० अधिकजनाः मृताः द्विसहस्राधिकाश्च जनाः व्रणिताः। यदि कयाचित् घटनया भारतीयस्वतन्त्रतासंग्रामे सर्वाधिकप्रभावो निपातितः सेयं जघन्या हत्याघटना एव आसीत्। एवं मन्यते यत् भारते ब्रिटिशशासनस्य समाप्तेरारम्भ आसीत्। १३ अप्रिलमासे १९१९ तमवर्षे बैसाखीदिनमासीत्। बैसाखी इत्थं तु अशेषभारते आयोज्यते परन्तु विशेषोत्साहः पर्वणः पंजाबहरियाण-प्रान्तयोः भवति तत्र शैत्ये रबीसस्यप्राप्तेः परं नववर्षहर्षावसरे पर्व भवति। अस्मिन्नेव दिने १३ अप्रिलमासे १६९९ तमवर्षे दशमेन अन्तिमगुरुणा गोविन्दसिंहेन च खालसासम्प्रदायस्य स्थापना कृता। अतः एव सिक्समुदायः विशेषरूपेण उत्सवस्यायोजनं करोति। अस्मिन् अवसरे अमृतसरे मेलापक आसीत् तत्र शताधिकजनाः सम्मिलिताः आसन्।

**आङ्ग्लीयानां प्रच्छन्नेच्छा -**

प्रथमविश्वयुद्धे (१९१४-१९१८) तमवर्षेषु भारतीयनेतारः जनता च प्रकटरूपेण ब्रिटिशजनानां साहाय्यम् अकरोत्। तत्र त्रयोदशलक्ष-भारतीय-सैनिकाः सेवकाश्च यूरोप-अफ्रिका-मिडल-ईस्ट-देशेषु ब्रिटिशपक्षतः नियुक्ताः आसन् तेषु ४३,०००भारतीयसैनिकाः युद्धे हुतिंगताः। युद्धसमाप्तेः परं भारतीयनेतारः जनता च चिन्तयति स्म यत् ब्रिटिशसर्वकारः तत्र स्वातन्त्र्ये साहाय्यं करिष्यति तथा च भारतीयान् प्रति च मृदुतया व्यवहरिष्यन्ति परन्तु ब्रिटिशसर्वकारेण माण्टेगू-चेम्सफोर्ड-संशोधनं प्रवर्तितं तच्च भारतीयजनान् विरुध्य आसीत्।

गान्धी अपि तदा दक्षिणाफ्रिकातः भारतं प्रत्यागतवान् आसन् अपि च शनैः शनैः तस्य लोकप्रियता वर्धते स्म। सः रोलेट-एक्ट इत्यस्य विरोधकार्यक्रमम् आरब्धवान्, आन्दोलनम् अभिभवितुं ब्रिटिशसर्वकारः इष्टवान् ततः नैके नेतारः निगृहीताः। आक्रोशः तस्मात् जनतायां वर्धितः। जनाः जनसुविधाः बाधितवन्तः। आन्दोलनं दृढयितुम् अमृतसरे गोष्ठी आसीत्, तत्र जनप्रतिरोधः आसीत् तत्र नेतारः जनान् सम्बोधयन्ति स्म।

तदैव ब्रिगेडियरजनरल-रेजीनाल्ड-डायरः ९०ब्रिटिशसैनिकैः सहागतवान्। तेन तत्र सैनिकाः आदिष्टाः यत् ते जनसम्मर्दे गुलिकाप्रहारान् कुर्युः। सहसा एव सैनिकैः आक्रमणं कृतं। जनाः पलायितुमपि न शक्नुवन्ति स्म यतः तत्र उद्यानं परितः गृहाणि आसन् मार्गश्च च बहिरागन्तुम् एकः एव आसीत् सः अपि अतिसंकीर्णः आसीत्। तत्र उद्यानाभ्यन्तरे कूपः आसीत् आत्मरक्षार्थं जनाः तत्र कूर्दितवन्तः तत्र नैके जनाः तस्मात् मृताः।

अस्य हत्याकाण्डस्य विश्वव्यापिनी निन्दा जाता तस्मात् ब्रिटिशपक्षतः भारते नियुक्तः सेक्रेटरी-आफ-स्टेट-एडविन-माण्टेगूः १९१९अन्ते निरीक्षणाय हंटरकमीशन इति नियुक्तः। डायरः तत्र स्वीकृतवान् यत् तेन निर्दोषः जनाः हताः। तस्मात् एव डायरः पदावनतः जातः सः च इंग्लैण्डं देशं प्रतिगतवान्। हत्याकाण्डस्य निरीक्षणाय कांग्रेसेन मदनमोहनमालवीयस्य अध्यक्षतायां समितिः नियुक्ता।

गुरुदेवः रवीन्द्रनाथटैगोरः हत्याकाण्डविरोधे स्वनाटइहुडं प्रत्यपसारितवान्। जघन्यघटनानन्तरमपि जनोत्साहः न्यूनो न जातः। अपि तु सक्रियता अधिका जनानां जाता। घटनायाः परं समग्रदेशे आक्रोशः आसीत्। सहस्राधिकभारतीयाः जलियांवालाबागस्य मृदां मस्तकीकृत्य देशं स्वातन्त्रयितुं दृढसंकल्पान् अकुर्वन्। जलियांवालाहत्या-काण्डकाले भगतसिंहः द्वादशवर्षीयः आसीत्, तस्य चिन्तने गभीरप्रभावः जातः। भगतसिंह तदा १२ मीलपरिमितं विद्यालयात् पदाति चलित्वा तत्र उद्यानं प्राप्तवान्। भारतीयराष्ट्रियकांग्रेसेन प्रस्तावः पारितः अपि च स्मारकार्थं न्यासस्थापना कृता। १९२३तमवर्षे न्यासेन स्मारकपरियोजनार्थं भूमिः क्रीताः। अमेरिकीयवास्तुकारेण पोल्केन चित्राङ्कनं कृतम्। १३अप्रिलमासे १९६१ तमवर्षे नेहरुः अन्यनेतारः भारतस्य राष्ट्रपतेः राजेन्द्रप्रसादस्य सान्निध्ये स्मारकस्योद्घाटनं कृतवन्तः। १९९७ तमवर्षे महारानी-एलिजाबेथः अस्मिन् स्मारके मृतकश्रद्धाञ्जलिमर्पितवती। २०१३ तमवर्षे ब्रिटिशप्रधानमन्त्री डेविडकैमरानः अपि स्मारके प्राप्तवान्। यात्रीपुस्तके सः अलिखत् यत् ब्रिटिशेतिहासे इयं लज्जास्पदघटना आसीत्।

**-सहायक प्रचार अधिकारी**
**दिल्ली संस्कृत अकादमी,**
**दिल्ली सर्वकारः**

# धन्योऽयं भारतं देशः*

अखण्डब्रह्माण्डनायकेन भगवता स्वयम्भुवा चतुर्दशलोकात्मकं जगत्सृष्टम्। इदं सम्पूर्णं जगत् चराचरैर्व्याप्तमाभाति। इमे सर्वे चराचराः किमुत देवा अपि इमं भारतदेशं द्रष्टुं कामयन्ते। वयं भारतीयाः, अतएव अस्माकमेष उद्घोषः **'धन्यास्तु ते भारतभूमि भागे' 'धन्योऽयं भारतं देशः**, किं वा **'दुर्लभं भारते जन्म'** इति ।

भारतवर्षस्य यो हि महान् महिमा विराजते तं स एव जानाति सकृदपि अत्रागत्य एतस्य चाभ्यन्तरिकं बाह्यञ्च स्वरूपं सम्यक्तयामनुभूतञ्च स्यात्। तत्स्वरूपं यथाबुद्धिबलोदयम् अत्र वर्णनपथमवतात यते। भारतीया संस्कृतिः संस्कृतनिष्ठा, संस्कृतं हि दैवीवाग् यत्र वेदानारभ्य सर्वो ज्ञानराशिः संस्कृतमय एव। 'अलौकिकं भारतीयं दर्शनं यदर्थम् अद्यावधि यतमानाः पाश्चात्याः न तस्य पारङ्गता। एतस्य मूलभूताः अस्माकम् अध्यात्मज्ञानवन्तः मनुष्या एव आसन्, येषां त्रिकालममलमासीत्। अतएव ते सम्पूर्णं जगत् करामलकवत् पश्यन्तः कणादादयो महर्षयः विविधं दर्शनशास्त्राणि प्राणैषिषुः। तेषु षड् आस्तिकदर्शनानि–योग–साङ्ख्य–न्याय–वैशेषिक–वेदान्त–मीमांसाभिधानि। षडेव नास्तिकदर्शनानि–शून्यवादेनेकं दर्शनं माध्यमिकानाम्, क्षणिकज्ञानमात्रवादेनापरं योगाचार्याणाम्, ज्ञानाकारानुमेयक्षणिक–बाह्यार्थवादेन तृतीयं सौत्रान्तिकानाम्, प्रत्यक्षलक्षणक्षणिक–बाह्यर्थवादेन चतुर्थं वैभाषिकाणाम्, देहातिरिक्तदेहपरिणामात्म– कवादेन पञ्चमं दिगम्बराणाम्, तथा देहात्मवादेन षष्ठं चार्वाकाणाम्। इति वेदबाह्यत्वान्नास्तिकदर्शनानि। एतेषां समेषां विशेषज्ञः भारतः भारतीयो वा विद्वान् आसीत् अस्ति भविष्यति च, यथोक्तम्मनुनास्वकीयायां स्मृतौ–

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**



* प्रस्तावरत्नाकरतः संकलितः

एतदर्थम् अयं भारतदेशः जगद्गुरुपदेनाऽपि समाद्रियते। कथङ्कारम् अयम् उदारभावभरित हृदयोऽस्ति तदप्यवलोकनीयम्। 'सत्यं वद, धर्म चर, अहिंसा परमो धर्मः, सङ्गच्छध्वं, संवदध्वम्, मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षे, मागृधः कस्यस्विद् धनम्।' इत्यादिसर्वहितकरान् भावान् उररीकुर्वन् अयं सुचिराद् विराजते, अतः कोऽन्यः देशः अस्य तुलामारोढुं प्रभवेत्। एतद्भारतवर्षस्य आध्यात्मिकस्वरूप–दिग्दर्शनम्। एतदनन्तरमस्य बहिर्भवं सुषमासमृद्धम् एकच्छत्रं साम्राज्यं दिङ्मात्रमुदाह्रियते। श्रीमद्भागवते वेदव्यासमहाभागः भारतभुवं वर्णयन् कथयति–

**अहो! भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत्।**
**गायन्ति यत्रत्यजना मुरारेभद्राणि कर्माण्यवतारवन्ति।**

यत्र भगवतः समये समये अवताराः समभवन् स एव भारतदेशः। रामराज्ये वानररूपेण, द्वापरे चतुःषष्टिकलावतारस्य श्रीकृष्णस्य बाललीलां द्रष्टुकामा देवा गोपीरूपेण अस्मिन्नेव भारते वर्षे चिरमुषिताः। अस्य देशस्य शुभ्रमुकुटायमानः हिमालयो नाम नगाधिराजः प्रहरीतिनिगद्यते। यतः प्रभवा गङ्गा, गोदावरी, यमुना, सरयू, ब्रह्मपुत्र, काबेरी प्रभृतयो नद्यः चराचरं तोषयन्त्यः, पावयन्त्यः,सिञ्चन्त्यः, जननीव शीतलं हृदयमुद्वहन्त्यः आसमुद्रं प्रयान्ति। समुद्रश्च एतस्य पादोदकैः परिपूर्णः आत्मानम् अपारम् अगाधञ्च मनुते।

व्यास–वाल्मीकि–कालिदासादयः कविकुलमूर्धन्याः,हरिश्चन्द्र–मान्धाता–शिवि–राम–कृष्ण–युधिष्ठिर–विक्रमादित्य–भोजप्रमुखाः पार्थिवा अमुष्य एव यशोविस्तारयन्तः इममेव देशं समलञ्चक्रुः। विविध–तीर्थानामपि अयमेव एकमायतनम्। अत्रैव भगवता पार्थसम्बोधनाय गीता सुगीता। अत एव सदाऽऽशय–समृद्धायां भारतभुवि देवा अपि मनुष्यरूपेण स्वेच्छया अवतरन्ति, प्रशंसन्ति च एतस्य भागधेयानि। तद्यथा–

**गायन्ति देवा किल गीतकानि धन्यास्तु तै भारतभूमिभागे।**
**स्वर्गापर्गास्पदहेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात्॥**

यत्र आगमनाय, आगत्य निवासाय च स्वर्गीयाः अपि अभिलषन्ति तस्मैः कः न स्पृहयेत्। नूनं भारतभूः एव 'वसुन्धरा' विश्वम्भरा' 'वसुमती' च एतानि नामानि सफलयति। अतः सत्यमिदमुच्यते दुर्लभं भारते जन्म' किं वा 'धन्योऽयं भारतं देशः।

**धन्योऽयं भारतं देशो धन्येयं सुरभारती।**
**तत्पूजका वयं धन्या अहो! धन्या परम्परा॥**

**–प्रस्तावरत्नाकरतः संकलितः**

# व्यावहारिक-संस्कृत-शिक्षणम्

श्रीधरः - त्वं नौकाश्चालयसि न वा?

देवदत्तः- चालयामि।

श्रीधरः - नदीषु समुद्रे वा?

देवदत्तः- उभयत्र चालयामि।

श्रीधरः - कस्यां दिशि कस्मिन्देशे च गच्छति?

देवदत्तः- सर्वासु दिक्षु पातालदेशपर्य्यन्तम्।

श्रीधरः - ताः नौकाः कीदृशाः सन्ति केन चलन्ति?

देवदत्तः- कैवर्त्तवाय्वग्निजलकलावाष्पादिभिः।

श्रीधरः - याः पुरुषाश्चालयन्ति ता ह्रस्वाः या महत्यस्ता वाय्वादिभिश्चाल्यन्ते ताश्चाश्वतरी-श्याम कर्णाश्वाख्याः सन्ति।



देवदत्तः- अस्य किम्मूल्यम्?

श्रीधरः - पञ्च रूप्यकाणि।

देवदत्तः- गृहाणैतानि रूप्यकाणि वस्त्रं देहि

श्रीधरः - अद्यत्वे घृतस्य कोऽर्घः?

देवदत्तः- पञ्चशतैः सपादप्रस्थं विक्रीणते?

श्रीधरः - गुडस्य को भावः?

देवदत्तः- दशरूप्यकैः एकसेटकमात्रं ददति

श्रीधरः - त्वमापणं गच्छ, एलामानय।

देवदत्तः- आनीता, गृहाण।

श्रीधरः - कस्य हट्टे दधिदुग्धे सुष्ठु प्राप्येते

देवदत्तः- स सत्येनैव क्रयविक्रयौ करोति।

श्रीधरः - श्रीपतिर्वणिक्कीदृशोऽस्ति?

देवदत्तः- स मिथ्याकारी।

श्रीधरः - अस्मिन्संवत्सरे कियांल्लाभो व्ययश्च जातः?

देवदत्तः- मम खल्वस्मिन् वर्षे लक्षत्रयस्य हानिर्जाता।

श्रीधरः - कस्तूरी कस्मादानीयते?

देवदत्तः- नेपालात्।

श्रीधरः – बहुमूल्यमाविकं कुत आनयन्ति?
देवदत्तः– कश्मीरात्।
श्रीधरः – अस्य कीदृशो रोगो वर्त्तते?
देवदत्तः– जीर्णज्वरोऽस्ति।
श्रीधरः – औषधं देहि।
देवदत्तः– ददामि।
श्रीधरः – परन्तु पथ्यं सदा कर्त्तव्यम्। न हि पथ्येन विना रोगो निवर्त्तते।
देवदत्तः– अयं कुपथ्यकारित्वात् सदा रुग्णो वर्त्तते।
श्रीधरः – अस्य पित्तरकोपो वर्त्तते।
देवदत्तः– मम कफो वर्धत औषधं देहि।
श्रीधरः – निदानं कृत्वा दास्यामि।
देवदत्तः– अस्य महान् कासश्वासोऽस्ति।
श्रीधरः – मम शरीरे तु वातव्याधिर्वर्त्तते।
देवदत्तः– संग्रहणी निवृत्ता न वा?
श्रीधरः – अद्यपर्यन्तं तु न निवृत्ता।
देवदत्तः– औषधं संसेव्य पथ्यं करोषि न वा?
श्रीधरः – क्रियते परन्तु सुवैद्यो न मिलति कश्चिद्यः सम्यक् परीक्ष्यौषधं दद्यात्।
देवदत्तः– तृषाऽस्ति चेज्जलं पिब।



## शब्दार्थाः

| | | | |
|---|---|---|---|
| इक्षु | – गन्ना | प्रविशतु | – प्रवेश करना |
| स्मर | – याद करना | लभ्य | – प्राप्त |
| स्वेद | – पसीना | नौका | – नाव |
| प्रचण्डभानु | – सूर्य का तेज | उभयत्र | – दोनों ओर |
| मुदा | – प्रसन्न | दिक्षु | – दिशायें |
| खलु | – निश्चय | आपणं | – बाजार |
| नृपं | – राजा को | हट्ट | – दुकान |
| प्रणम्य | – प्रणाम करके | व्यय | – खर्चा |
| प्रच्छतु | – पूछो | औषधं | – दवाई |
| अन्वेष्टुमिच्छामि | – खोजना चाहता हूँ | निदानं | – उपाय |
| अल्पाहारं | – नाश्ता | तृषा | – प्यास |

# शब्द-रूपम्

## कपिः = ( बन्दर )



| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कपिः | कपी | कपयः |
| द्वितीया | कपिम् | कपी | कपीन् |
| तृतीया | कपिना | कपिभ्याम् | कपिभिः |
| चतुर्थ | कपये | कपिभ्याम् | कपिभ्यः |
| पंचमी | कपेः | कपिभ्याम् | कपिभ्यः |
| षष्ठी | कपेः | कप्योः | कपिनाम् |
| सप्तमी | कपौ | कप्योः | कपिषु |
| सम्बोधनम् | हे कपे! | हे कपी! | हे कपयः! |

## भूपतिः = ( राजा )



| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भूपतिः | भूपती | भूपतयः |
| द्वितीया | भूपतिम् | भूपती | भूपतीन् |
| तृतीया | भूपतिना | भूपतिभ्याम् | भूपतिभिः |
| चतुर्थ | भूपतये | भूपतिभ्याम् | भूपतिभ्यः |
| पंचमी | भूपतेः | भूपतिभ्याम् | भूपतिभ्यः |
| षष्ठी | भूपतः | भूपत्योः | भूपतिनाम् |
| सप्तमी | भूपतौ | भूपत्योः | भूपतिषु |
| सम्बोधनम् | हे भूपते! | हे भूपती! | हे भूपतयः! |

## पति = ( स्वामी )

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पतिः | पती | पतयः |
| द्वितीया | पतिम् | पती | पतीन् |
| तृतीया | पत्या | पतिभ्याम् | पतिभिः |
| चतुर्थ | पत्ये | पतिभ्याम् | पतिभ्यः |
| पंचमी | पत्युः | पतिभ्याम् | पतिभ्यः |
| षष्ठी | पत्युः | पत्योः | पतिनाम् |
| सप्तमी | पत्यौ | पत्योः | पतिषु |
| सम्बोधनम् | हे पते! | हे पती! | हे पतयः! |

## सखी = ( मित्र )

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सखा | सखायौ | सखाय: |
| द्वितीया | सखायम् | सखायौ | सखीन् |
| तृतीया | सख्या | सखिभ्याम् | सखिभि: |
| चतुर्थ | सख्ये | सखिभ्याम् | सखिभ्य: |
| पंचमी | सख्यु: | सखिभ्याम् | सखिभ्य: |
| षष्ठी | सख्यु: | सख्यो: | सखिनाम् |
| सप्तमी | सख्यौ | सख्यो: | सखिषु |
| सम्बोधनम् | हे सखे! | हे सखियौ! | हे सखाय:! |

## सुधी = ( बुद्धिमान् )

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सुधी: | सुधियौ | सुधिय: |
| द्वितीया | सुधियम् | सुधियौ | सुधिय: |
| तृतीया | सुधिया | सुधिभ्याम् | सुधिय: |
| चतुर्थ | सुधिये | सुधिभ्याम् | सुधिभ्य: |
| पंचमी | सुधिय: | सुधिभ्याम् | सुधिभ्य: |
| षष्ठी | सुधिय: | सुधियो: | सुधिनाम् |
| सप्तमी | सुधियि | सुधियो: | सुधिषु |
| सम्बोधनम् | हे सुधी! | हे सुधियौ! | हे सुधिय:! |

## शिशु = ( बच्चा )

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | शिशु: | शिशू | शिशव: |
| द्वितीया | शिशुम् | शिशू | शिशून्: |
| तृतीया | शिशुना | शिशुभ्याम् | शिशुभि: |
| चतुर्थ | शिशवे | शिशुभ्याम् | शिशुभ्य: |
| षष्ठी | शिशो: | शिश्वो: | शिशूनाम् |
| सप्तमी | शिशौ | शिश्वो: | शिशुषु |
| सम्बोधनम् | हे शिशो! | हे शिशू! | हे शिशव:! |

## भानु = ( सूर्य )

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भानुः | भानू | भानवः |
| द्वितीया | भानुम् | भानू | भानून्ः |
| तृतीया | भानुना | भानुभ्याम् | भानुभिः |
| चतुर्थ | भानुवे | भानुभ्याम् | भानुभ्यः |
| पंचमी | भानोः | भानुभ्याम् | भानुभ्यः |
| षष्ठी | भानोः | भान्वोः | भानूनाम् |
| सप्तमी | भानौ | भान्वोः | भानुषु |
| सम्बोधनम् | हे भानो! | हे भानू! | हे भानवः! |

## स्वयम्भू = ( ब्रह्मा )

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | स्वयम्भूः | स्वयम्भुवौ | स्वयम्भुवः |
| द्वितीया | स्वयम्भुवम् | स्वयम्भुवौ | स्वयम्भुवः |
| तृतीया | स्वयम्भुवा | स्वयम्भुभ्याम् | स्वयम्भूभिः |
| चतुर्थ | स्वयम्भुवे | स्वयम्भुभ्याम् | स्वयम्भुभ्यः |
| पंचमी | स्वयम्भुवः | स्वयम्भुभ्याम् | स्वयम्भुभ्यः |
| षष्ठी | स्वयम्भुवः | स्वयम्भुवोः | स्वयम्भुवम् |
| सप्तमी | स्वयम्भुवि | स्वयम्भुवोः | स्वयम्भुषु |
| सम्बोधनम् | हे स्वयम्भूः! | हे स्वयम्भुवौ! | हे स्वयम्भुवः! |

## वर्षाभू= ( मेंढक )

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वर्षाभूः | वर्षाभ्वौ | वर्षाभ्वः |
| द्वितीया | वर्षाभ्वम् | वर्षाभ्वौ | वर्षाभ्वः |
| तृतीया | वर्षाभ्वा | वर्षाभुभ्याम् | वर्षाभूभिः |
| चतुर्थ | वर्षाभ्वे | वर्षाभुभ्याम् | वर्षाभुभ्यः |
| पंचमी | वर्षाभ्वः | वर्षाभुभ्याम् | वर्षाभुभ्यः |
| षष्ठी | वर्षाभ्वः | वर्षाभ्वोः | वर्षाभ्वाम् |
| सप्तमी | वर्षाभ्वि | वर्षाभ्वोः | वर्षाभुषु |
| सम्बोधनम् | हे वर्षाभूः! | हे वर्षाभ्वौ! | हे वर्षाभ्वः! |

# धातु रूपम्

## अद् (खाना)

### (लट् लकार)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष- | अत्ति | अत्तः | अदन्ति |
| मध्यमपरुष- | अत्सि | अत्थः | अत्थ |
| उत्तमपुरुष- | अद्मि | अद्वः | अद्मः |

### (लोट् लकार)

| | | | |
|---|---|---|---|
| प्रथमपुरुष- | अत्तु,अत्तात् | अत्ताम् | अदन्तु |
| मध्यमपरुष- | अद्धि, अत्तात् | अत्तम् | अत्त |
| उत्तमपुरुष- | अदानि | अदाव | अदाम |

### (विधिलिङ् लकार)

| | | | |
|---|---|---|---|
| प्रथमपुरुष- | अद्यात् | अद्याताम् | अद्युः |
| मध्यमपरुष- | आद्यः | अद्यातम् | अद्यात |
| उत्तमपुरुष- | अद्याम् | अद्याव | अद्याम |

### (लङ् लकार)

| | | | |
|---|---|---|---|
| प्रथमपुरुष- | आदत् | आत्ताम् | आदन्, आदुः |
| मध्यमपरुष- | आदः | आत्ताम् | आत्त |
| उत्तमपुरुष- | आदम् | आद्ध,आद्व | आद्म |

### (लृट् लकार)

| | | | |
|---|---|---|---|
| प्रथमपुरुष- | अत्स्यति | अत्स्यतः | अत्स्यन्ति |
| मध्यमपरुष- | अत्स्यसि | अत्स्यथः | अत्स्यथ |
| उत्तमपुरुष- | अत्स्यामि | अत्स्यावः | अत्स्यामः |

## रुद् (रोना)

### (लट् लकार)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष- | रोदिति | रुदतः | रुदन्ति |
| | [रुदति] | [रुदितः] | [रुदिन्ति] |
| मध्यमपरुष- | रोदिषि | रुदिथः | रुदथि |
| | [रुदति] | [रुदथः] | [रुदितः] |

| | | | |
|---|---|---|---|
| **उत्तमपुरुष**– | रोदिमि [रुदामि] | रुदिव: [रुदव:] | रुदिम: [रुदम:] |

**( लोट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | रोदितु, रोदितात् | रुदिताम् | रुदन्तु |
| **मध्यमपरुष**– | रुदिहि, रुदितात् | रुदितम् | रुदति |
| **उत्तमपुरुष**– | रोदानि | रोदाव | रोदाम |

**( विधिलिङ् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | रुद्यात् | रुद्याताम् | रुद्यु: |
| **मध्यमपरुष**– | रुद्या: | रुद्यातम् | रुद्यात |
| **उत्तमपुरुष**– | रुद्याम् | रुद्याव | रुद्याम |

**( लङ् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अरोदत्, अरोदीत् | अरुदिताम् | अरोदन् |
| **मध्यमपरुष**– | अरोद:,अरोदी: | अरुदितम् | अरुदित |
| **उत्तमपुरुष**– | अरोदम् | अरुदिव | अरुदिम |

**( लृट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | रोदिष्यति | रोदिष्यत: | रोदिष्यन्ति |
| **मध्यमपरुष**– | रोदिष्यसि | रोदिष्यथ: | रोदिष्यथ |
| **उत्तमपुरुष**– | रोदिष्यामि | रोदिष्याव: | रोदिष्याम: |

## स्वप् ( सोना )

**( लट् लकार )**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष–** | स्वपिति | स्वपित: | स्वपन्ति |
| **मध्यमपरुष**– | स्वपिषि | स्वपिथ: | स्वपिथ |
| **उत्तमपुरुष**– | स्वपिमि | स्वपिव: | स्वपिम: |

**( लोट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | स्वपितु, स्वपितात् | स्वपिताम् | स्वपन्तु |
| **मध्यमपरुष**– | स्वपिहि, स्वपितात् | स्वपितम् | स्वपित |
| **उत्तमपुरुष**– | स्वपानि | स्वपाव | स्वपाम |

( विधिलिङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | स्वप्यात् | स्वप्याताम् | स्वप्युः |
| **मध्यमपरुष-** | स्वप्याः | स्वप्यातम् | स्वप्यात |
| **उत्तमपुरुष-** | स्वप्याम् | स्वप्याव | स्वप्याम |

( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | अस्वपत्, अस्वपीत् | अस्वपिताम् | अस्वपन् |
| **मध्यमपरुष-** | अस्वपः | अस्वपितम् | अस्वपित |
| **उत्तमपुरुष-** | अस्वपम् | अस्वपिव | अस्वपिम |

( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | स्वप्स्यति | स्वप्स्यतः | स्वप्स्यन्ति |
| **मध्यमपरुष-** | स्वप्स्यसि | स्वप्स्यथः | स्वप्स्यथ |
| **उत्तमपुरुष-** | स्वप्स्यामि | स्वप्स्यावः | स्वप्स्यामः |

## हन् ( मारना )

( लट् लकार )

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष-** | हन्ति | हतः | घ्नन्ति |
| **मध्यमपरुष-** | हसि | हथः | हथ |
| **उत्तमपुरुष-** | हन्मि | हन्वः | हन्मः |

( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | हन्तु, हतात् | हताम् | घ्नन्तु |
| **मध्यमपरुष-** | जहि, हतात् | हताम् | हत |
| **उत्तमपुरुष-** | हनानि | हनाव | हनाम |

( विधिलिङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | हन्यात् | हन्याताम् | हन्युः |
| **मध्यमपरुष-** | हन्याः | हन्यातम् | हन्यात |
| **उत्तमपुरुष-** | हन्याम् | हन्याव | हन्याम |

( लङ् लकार )

| | | | |
|---|---|---|---|
| प्रथमपुरुष- | अहन् | अहताम् | अघ्नन् |
| **मध्यमपरुष-** | अहन | अहतम् | अहत |
| **उत्तमपुरुष-** | अहनम् | अहन्व | अहन्म |

## इण् (जाना)

(लट् लकार)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुष–** | एति | इतः | यन्ति |
| **मध्यमपरुष–** | एषि | इथः | इथ |
| **उत्तमपुरुष–** | इमि | इवः | इमः |

(लोट् लकार)

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | एतु, इतात् | इताम् | यन्तु |
| **मध्यमपरुष–** | इति, इतात् | इतम् | इत |
| **उत्तमपुरुष–** | अयानि | अयाव | अयाम |

(विधिलिङ् लकार)

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | इयात् | इयाताम् | इयुः |
| **मध्यमपरुष–** | इयाः | इयातम् | इयात |
| **उत्तमपुरुष–** | इयाम् | इयाव | इयाम |

(लङ् लकार)

| | | | |
|---|---|---|---|
| प्रथमपुरुष– | ऐत् | ऐताम् | आयन् |
| **मध्यमपरुष–** | ऐः | ऐतम् | ऐत |
| **उत्तमपुरुष–** | आयम् | ऐव | ऐम |

(लृट् लकार)

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | एष्यति | एष्यतः | एष्यन्ति |
| **मध्यमपरुष–** | एष्यसि | एष्यथः | एष्यथ |
| **उत्तमपुरुष–** | एष्यामि | एष्यवः | एष्यामः |

**–संकलकः**
**सम्पादक सहायकः**
**दिल्ली–संस्कृत–अकादमी**

## सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# "संस्कृत–चन्द्रिका"

नैतिक–मूल्यों के साथ–साथ
सम्पूर्ण देश के बाल–साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

# "संस्कृत–चन्द्रिका"

( आई.एस.एस.एन.–2347–1565 )

संस्कृत भाषा के प्रचार–प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत–भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान–विज्ञान तथा नैतिक शिक्षा की बाल– मासिक पत्रिका जो प्रत्येक वर्ग के पाठक–समुदाय की अपेक्षा के

**मूल्यः– एक प्रति रु.२५/– मात्र, वार्षिक सदस्यता शुल्क रु. २५०/– मात्र**

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

# "संस्कृत–चन्द्रिका"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.–५ झण्डेवालान, करोलबाग, नई दिल्ली–११०००५**
**दूरभाष सं.– ०११–२३६३५५९२, २३६८१८३५**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वामित्व द्वारा मै. एस.डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली–64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.–5,
झण्डेवालान, करोलबाग, नई दिल्ली–110005 से प्रकाशित।